**प्रधानमन्त्री-कौलालंपुर:**

प्रधानमन्त्री नरेन्द्र-मोदी अद्य मलेशियादेशस्य द्विदिवसीययात्रायाः आरम्भं करिष्यति। देशद्वयं स्वस्य व्यापक-रणनीतिक-सहभागिता-सुदृढीकरण-सहितां सम्पूर्ण-सम्बन्धस्य आमूलाग्र-समीक्षां करिष्यति। मलेशियादेशे भारतस्य उच्चायुक्तेन बी.एन. रेड्डी, इत्यनेन उक्तं यत् द्वयोः पक्षयोः मध्ये चर्चायाम्, व्यापारः अर्थव्यवस्था च, उदयमानप्रौद्योगिकीः, ऊर्जा, शिक्षा च इत्यादिषु प्रमुखक्षेत्रेषु सहकार्यं सुदृढं कर्तुं ध्यानं केन्द्रीक्रियते, यतः उभयपक्षः पारम्परिकक्षेत्रेभ्यः परं मैत्र्याः विस्तारं कर्तुं विचारं करोति। यात्रायाः अवसरे कौलालम्पुर-नगरे 'सेलामत दतङ्ग मोदी जी' इति नाम्नः विशालः सामुदायिकः कार्यक्रमः भविष्यति, यद्धि द्वयोः देशयोः जनानां जनसम्बन्धस्य सुदृढतां प्रतिबिम्बयिष्यति। अस्मिन् सामुदायिककार्यक्रमे प्रधानमन्त्री नरेन्द्रमोदी, मलेशियाप्रधानमन्त्री अनवर इब्राहिमश्च संयुक्तरूपेण सम्बोधयिष्यतः, भारत-मलेशिया-सम्बन्धेषु वर्धमान-निकटतां प्रकाशयिष्यतः। रविवासरे प्रतिनिधिमण्डलस्तरीयवार्ता, सहमतिपत्रस्य आदानप्रदानं च निर्धारितम् वर्तते।

**राष्ट्रपतिः**

राष्ट्रपतिः द्रौपदी मुर्मूः अद्य जगदलपुरे ऐषमः 'बस्तर पाण्डुम' इति भव्य-आदिवासी-सांस्कृतिक-महोत्सवस्य उद्घाटनं करिष्यति। आदिवासीसमुदायस्य अयं त्रिदिवसीयः उत्सवः फरवरी नवमदिनांक-पर्यन्तं भविष्यति अथ आदिवासीसमुदायस्य जीवनशैलीम्, विश्वासम्, आचार-विचारान्, समृद्ध-सांस्कृतिक-परम्पराम् च प्रदर्शयति ।

**निर्वाचन-आयोगः**

उत्तरप्रदेशे निर्वाचन-आयोगेन प्रचाल्यमानस्य विशेष-सघन-पुनरीक्षणस्य अभ्यासस्य अन्तर्गतम् आक्षेपाणां समयसीमा विस्तारिता अस्ति। मतदातारः अधुना षट्-मार्च-पर्यन्तं प्रपत्रं प्रस्तूय स्वनाम योजयितुं, परिवर्तनं याचयितुम् अथवा निर्वाचनसूचिकातः विलोपनस्य अनुरोधं कर्तुं शक्नुवन्ति ।

**पाकिस्तान-बम्ब:**

भारतेन, इस्लामाबादस्य मस्जिद-भवने बमविस्फोटस्य निन्दा कृता अथ प्राणहानेः कृते शोकः प्रकटितः। विदेशमन्त्रालयेन एकस्मिन् वक्तव्ये प्रोक्तम् यत्, एतत् दुर्भाग्यपूर्णमस्ति, यत् पाकिस्तानदेशः कदापि सामाजिकान् पीड्यमानानां समस्यानाम् उन्मूलनार्थं प्रयत्नं न अकरोत् अपि तु, स्वस्य गृहे उत्पादितानाम् आतंकवादादि-रोगानाम् कृते अन्येषाम् उपरि दोषं आरोपयति।

**क्रिकट्**

भारतेन, ह्यः, जिम्बाब्वेदेशस्य हरारे-नगरे, न्यून-नवदश-आयुर्वर्गस्य क्रिकेट् विश्व-चषक-क्रीडायाः अन्तिमचक्रे, इङ्ग्लैण्ड्-दलम्, ऐतिहासिकम् शतम् धावनांकैः विजित्य, षष्ठवारम् विश्वचषकः समवाप्तः। चतुर्दश-वर्षीयः वैभवः सूर्यवंशी, अशीति-कन्दुकेषु, पञ्चदश षट्केन, पञ्चदश चतुष्केन सहितानां पञ्चसप्तत्युत्तर-एकशतम् धावनांकानां समार्जनं कृत्वा भारतस्य विजयस्य आधारः अभवत्। यत्र हि नायकः आयुष महात्रे, पञ्चत्रिंशत् धावनांकानां योगदानं दत्तवान्। ततः परं भारतस्य क्षेपकाःआर. एस्. अम्बरीशः स्तोभकत्रयं प्राप्तवान् अथ दीपेश देवेन्द्रन्, कनिष्क-चौहानः च क्रमेण स्तोभकद्वयं प्राप्य विजयस्य निश्चयं कृतवन्तः। वैभव-सूर्यवंशी क्रीडाश्रेष्ठः शृंखलाश्रेष्ठश्च घोषितः। राष्ट्रपतिः द्रौपदी मुर्मूः, उपराष्ट्रपतिः सी पी राधाकृष्णन्, प्रधानमन्त्री नरेन्द्रमोदी अन्ये च नेतारः अस्य विजयस्य कृते अभिनन्दनानि प्रकटितवन्तः।

**विंशति-प्रतिविंशतिः**

भारतस्य श्रीलङ्कायाः च सह-आयोजकत्वे ऐषमः अन्ताराष्ट्रिय-विंशतिम्-प्रतिविंशतिः-क्रिकेट्-विश्वचषक-स्पर्धा अद्य आरभ्यते। अयं क्रिकेट्-स्पर्धा मार्चमासस्य अष्टम-दिनाङ्कपर्यन्तं भविष्यति, यत्र विंशतिः अन्ताराष्ट्रियदलानि, उभयदेशेषु विस्तृतेषु स्थलेषु, पञ्च-पञ्चाशत् मेलनेषु, स्पर्धां करिष्यन्ति। अद्य त्रीणि मेलनानि निर्धारितानि सन्ति। उद्घाटनक्रीडा कोलम्बोनगरस्य सिंहली-क्रीडाक्लब इत्यत्र भविष्यति, यत्र पाकिस्तानस्य नेदरलैण्ड्-दल-विरुद्धं मेलनं भविष्यति।

॥ **इति वार्ता:**॥